**સંકષ્ટ નાશન ગણેશ સ્તોત્રં**
**નારદ ઉવાચ |**
પ્રણમ્ય શિરસા દેવં ગૌરીપુત્રં વિનાયકમ્ |
ભક્તાવાસં સ્મરેન્નિત્યં આયુષ્કામાર્થસિધ્દ્યે || 1 ||
પ્રથમં વક્રતુંડં ચ એકદંતં દ્વિતીયકમ્ |
તૃતીયં કૃષ્ણપિંગાક્ષં ગજવક્ત્રં ચતુર્થકમ્ || 2 ||
લંબોદરં પંચમં ચ ષષ્ઠં વિકટમેવ ચ |
સપ્તમં વિઘ્નરાજં ચ ધૂમ્રવર્ણં તથાષ્ટકમ્ || 3 ||
નવમં બાલચંદ્રં ચ દશમં તુ વિનાયકમ્ |
એકાદશં ગણપતિં દ્વાદશં તુ ગજાનનમ્ || 4 ||
દ્વાદશૈતાનિ નામાનિ ત્રિસંધ્યં યઃ પઠેન્નરઃ |
ન ચ વિઘ્નભયં તસ્ય સર્વસિધ્દિકરં પરમ્ || 5 ||
વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ |
પુત્રાર્થી લભતે પુત્રાન્મોક્ષાર્થી લભતે ગતિમ્ || 6 ||
જપેદ્ગણપતિસ્તોત્રં ષડ્ભિર્માસૈઃ ફલં લભેત્ |
સંવત્સરેણ સિધ્દિં ચ લભતે નાત્ર સંશયઃ || 7 ||
અષ્ટભ્યો બ્રાહ્મણેભ્યશ્ચ લિખિત્વા યઃ સમર્પયેત્ |
તસ્ય વિદ્યા ભવેત્સર્વા ગણેશસ્ય પ્રસાદતઃ || 8 ||
ઇતિ શ્રી નારદ પુરાણે સંકષ્ટ નાશન ગણેશ સ્તોત્રં પરિપૂર્ણ |